PAPER - 1

# MT

**2017 .... .... 1100** **Seat No.**

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I PAPER - I**

**Time : 3 Hours** **(Pages 10)** **Marks : 80**

## ✶ प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

बालनरेन्द्रस्य हस्ताद् मूर्तिः पतिता, यतः तेन .........

(बालिका अश्वमार्गाद् दूरीकृता । / बालिकायाः माता वन्दिता ।)

II) पूर्णवाक्येन उत्तरत । १

कस्य अश्वयानं मार्गे वेगेन अधावत्?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

मार्गे बालिका रोदने मग्ना आसीत् ।

जिज्ञासुः विचारशीलः बालनरेन्द्रः सदैव चिन्तनमग्नः आसीत् । एकदा मात्रादिष्ट दुर्गादिव्याः मूर्तिं क्रीत्वा स गृहमागच्छत् । दुर्गापूजामहोत्सवं नाम शक्तिपूजनमिति स जानाति स्म । गृहं निवर्तमानः सः शक्तेः स्वरूपचिन्तने मग्नोऽभवत् । अकस्मात् तस्य विचारमाला खण्डिता तुरगपदानां रवेण । तेन दृष्टं यत् मण्डलाधिकारिणः अश्वयानं मार्गे वेगेन धावति इति । स्वसंरक्षणाय स मार्गाद् दूरं गन्तुं प्रायतत । सहसा तेन दृष्टं यत् काचन बालिका मार्गे खेलने मग्नास्ति । सा अश्वयानागमनविषये न जानाति । सवेगम् अश्वयानं तस्याः कृते यमयानमेव। तद्विलोक्य नरेन्द्रस्य हस्ताद् मूर्तिः पतिता । तेन धावित्वा झटिति सा बालिका अश्वमार्गाद् दूरीकृता तस्याः मात्रे च प्रदत्ता । तस्याः मात्रा अश्रुपूर्णनयनाभ्यां तस्मै आशीर्वचनं दत्तम् । यदा स गृहमागतः तदा तेन ज्ञातं यत् तस्य हस्तात् च्युता मूर्तिः तत्रैव मार्गे भग्ना वर्तते । आत्मानमपराधिनं मत्वा स मात्रे सर्वमकथयत् । तदा मात्रोक्तं ''वत्स नरेन्द्र, विरम शोकात्। यद्यपि त्वया मूर्तेः पूजा न कृता तथापि बालिकायाः साहाय्यं कृत्वा, बालिकारूपशक्तिदेवतायाः एव पूजनं कृतम्।'' धन्या सा माता धन्यश्च बालनरेन्द्रः ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

i) मात्रादिष्टः = ........... ।

(मात्र + आदिष्टः / मात्रा + इष्टः / मात्रा + आदिष्टः)

ii) आत्मानमपराधिनम् = ........... ।

(आत्मानम् + अपराधिनम् / आत्मा + नमपराधिनम् / आत्मानम + पराधिनम्)

II) गद्यांशात् पर्यायशब्दं चिनुत । १

i) रतः - ..............

ii) जननी - ..............

III) मञ्जूषातः उचिते विशेषणे चित्वा योग्यस्तम्भे लिखत । १

| बालनरेन्द्रः | मूर्तिः |
|---|---|
| जिज्ञासुः | ......... |
| ......... | च्युता |

IV) गद्यांशे आगते केऽपि २ पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्यये लिखत । १

३. **स्वमतप्रकटनम् ।** २

'भवन्मतानुसारेण शक्तिपूजनं कथं कर्तव्यम्' इति माध्यमभाषया स्पष्टीकुरुत ।

**ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) भिक्षुः नूतनचीवराणि प्रार्थयत, यतः ....................... । १

(बौद्धविहारे उत्सवः आसीत् / तस्य चीवरं जीर्णं जातम् )

II) कः कं वदति । १

ददातु मे नूतनचीवराणि ।

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

क्षुद्रवस्तुनिर्माणे अल्पमानवीयबलम् आवश्यकम् ।

एकदा कोऽपि भिक्षुःभगवन्तं प्रति जगाम । तं प्रणम्य अधोमुखः सोऽतिष्ठत् । भगवता पृष्टः सः अकथयत्, ''मम चीवराणि जीर्णानि अतः प्रार्थये ददातु मे नूतनचीवराणि ।'' ततः भगवता पृष्टं किं कृतं त्वया पुरातनचीवराणाम्? स प्रत्यवदत्, ''भगवन्, तत् चीवरं मया शयनीयरूपेणोपयोजितम्'' । भगवान् पप्रच्छ ''किं कृतं त्वया पुरातनशयनीयस्य।'' स उवाच अहं रात्रौ तद् उपधानरूपेण गृह्णामीति । तदाकर्ण्य कुतुहलेन भगवान् अवोचत्, ''वत्स ! कुत्रास्ति ते पुरातनमुपधानम् ।'' तदपि जीर्णं जातमतः मया तद् पादस्वच्छीकरणाय द्वारे पादपोशी इति स्थापितं तथा च पुरातनपादपोशिनः सूत्राणि दीपस्य कृते वर्तिरूपेण उपयुज्यन्ते मयेति प्रत्युवाच सः । तच्छ्रुत्वा प्रसन्नचित्तेन भगवता तस्मै नूतनचीवराणि दत्तानि । प्राचीनैषा कथा वस्तुवस्तुनः उपयोगः कथं करणीयः इति कथयति नः । क्षुद्रवस्तुनः निर्माणेऽपि नैसर्गिकसंसाधनं तथैव मानवीयपरिश्रमाणामावश्यकता विद्यते । चित्ताकर्षकं वस्तु क्रीत्वा पश्चाद् यदि न रोचते तर्हि सहजतया वयं बहिः त्यजामः । येन केनापि रूपेण वस्तुनः उपयोगः भवत्येव इति मनसि कर्तव्यम् । उपभुज्य त्यजत इति विचारं दूरीकृत्य विविधप्रकारैः पुनःपुनः उपयोगं कुरुत । मा कुरुत अनावश्यकक्रयणमिति भारतीया विचारसरणिः अनुकरणीया । स्मर्तव्यमिदं सर्वदा अमूल्यं विद्यते सर्वम् ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १

i) तच्छ्रुत्वा = ....... + ....... । (तच् + श्रुत्वा, तत + श्रुत्वा, तत् + श्रुत्वा)

ii) प्राचीनैषा = ....... + ....... । (प्राचीन + एषा, प्राचीन + ऐषा, प्राचीना + एषा)

II) विलोमपदं गद्यांशात् चित्वा लिखत । १

i) नूतनम् × .......

ii) उन्नतमुखः × .......

III) ..........., ............ उपधानम् । (विशेषणे चित्वा लिखत ।) १

IV) गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये चित्वा लिखत । १

**३. पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

i) पुरातनचीवरम् अहं शयनीयरूपेण योजितवान् इति भिक्षुः अकथयत् ।

ii) भगवान् भिक्षवे नूतनचीवराणि दत्तवान् ।

iii) भिक्षुः नूतनचीवराणि प्रार्थितवान् ।

iv) भिक्षुः भगवन्तं प्रति अगच्छत् ।

**क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। १

i) अर्वाचीनकाले अन्तर्जालमेव ........ । (ज्ञानकल्पवृक्षः / जालवृक्षः ।)

ii) जनाः ........ सत्वरं स्वसन्देशं प्रेषयन्ति । (वृत्तपत्रेण / सङ्गणकीयपत्रेण )

II) पूर्णवाक्येन उत्तरं लिखत । १

अन्तर्जालम् अस्मभ्यं किं वितरति?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

अन्तर्जालं ज्ञानवृद्ध्ये साहाय्यं न करोति।

यथा प्राचीनकाले कल्पवृक्षस्तथाऽर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः । निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यतेऽनेन । नानाशास्त्रकलानां ज्ञानं, वैश्विकवार्ताः, विविधसंस्थानां विभागानां च संज्ञापनं, सहस्रशः ग्रन्थाः, पर्यटनार्थमुपयुक्तज्ञानमासनारक्षणं च, दूरस्थानां दर्शनं तैश्च सह संभाषणं, सामान्यज्ञानं चेति समुपलभ्यतेऽनेन तन्त्रज्ञानेन । एष आधुनिकः कल्पवृक्षःअस्मभ्यं /अस्मासु सर्वविधं संज्ञापनं वितरति । सांख्यिकीयं ज्ञानं तथा सङ्गणकयन्त्रस्य 'सॉफ्टवेअर' इति कार्यक्रमोऽपि अन्तर्जाले उपलब्धो भवति । तस्य साहाय्येन

विविधविषयकाणि नानाकार्याणि विना कर्गजं शीघ्रतया सहजतया विना प्रमादं स्वल्पमानवीयबलेन कर्तुं शक्नुवन्ति सर्वे जनाः । अधुना आर्थिकमन्दायने तु सङ्गणकीयवाणिज्यं (E-Commerce) वरदानमेवेति सिद्धम् । आयुर्विमा-विद्युद्-दूरदर्शन-दूरध्वनि-सेवाशुल्कानि तथा विविधव्यवहारार्थं धनस्य हस्तान्तरणमनेन तन्त्रज्ञानेन कर्तुं शक्नुमो वयम् । एतदर्थं सद्यस्क-कुसीदवृत्तिः (Online Banking) अवलम्ब्यते । जनाः सङ्गणकीयपत्रेण (E-mail) सत्वरं स्वसन्देशं प्रेषयन्ति तथा सद्यस्क-आलापमपि कुर्वन्ति । एवं ज्ञानवृद्धिकरः वरः खलु एषः । अस्यान्तर्जालस्योपयोगः केवलं मानवहितायैव भवतु ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) चतुर्थपदं लिखत । १

i) सम्पूर्यतेऽनेन : सम्पूर्यते + अनेन :: समुपलभ्यतेऽनेन : ........ + ........ ।

II) 'वरः' नाम वरदानं पतिः च । १

i) ज्ञानवृद्धिकरः वरः खलु एषः ।
अस्मिन् वाक्ये वरः = ....... । (वरदानम् / पतिः)

ii) सीतायाः वरः राघवः ।
अस्मिन् वाक्ये वरः = ....... । (वरदानम् / पतिः)

III) मञ्जूषातः उचितं विशेषणं चिनुत । १

i) .......... गन्धाः ।

ii) .......... नानाकार्याणि ।

(विविधविषयकाणि / शीघ्रतया / आधुनिकः / सहस्रशः)

IV) गद्यांशे आगते केऽपि २ सप्तम्यन्तपदे चित्वा लिखत । ............., ............. । १

**३. पृथक्करणम् ।** २



**✶ द्वितीयः विभागः - पद्यम् ।**

**प्र.२. अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. पृथक्करणम् ।** २

वृक्षरेखाचित्रं पूरयत । (फारुकिवंशः)




परोऽपि हितवान्बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥१॥
वंशेऽथ तस्मिन् किल फारुकेन्द्रो बभूव राजा मलिकाभिधानः ।
तस्याभवत् सूनुरुदारचेताः कुलावतंसो गजनीनरेशः ॥२॥
तस्मादभूत् केसरखानवीरः पुनस्तदीयो हसनक्षितीशः ।
तस्मादभूदेदलशाहभूपः पुत्रोऽभवत् तस्य मुबारखेन्द्रः ॥३॥

**२. तात्पर्यलेखनम् ।** २

प्रथमस्य श्लोकस्य (परोऽपि...) तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. शब्दज्ञानम् ।**

I) विलोमपदानां मेलनं कुरुत । १

| | अ | ब |
|---|---|---|
| (1) | आतपः | क्वचित् । |
| (2) | नित्यम् | परस्परम् । |
| | | छाया । |

II) योग्यविशेषणे चित्वा लिखत । १

| |
|---|
| दुर्लभेषु .......। |
| सन्तः |
| विपक्षेषु .......। |

अणुपूर्वं बृहत्पश्चाद् भवत्यार्येषु सङ्गतम् ।
विपरीतमनार्येषु यथेच्छसि तथा कुरु ।।१।।
यथा छायातपौ नित्यं सुसम्बद्धौ परस्परम् ।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरम् ।।२।।
दुःखिताः परदुःखेषु निर्लोभा दुर्लभेषु च।
विपक्षेषु क्षमावन्तः सन्तः सुकृतपादपाः।।३।।

२. **अन्वयपूर्तिः ।** २

आर्येषु सङ्गतम् ....... पश्चात् बृहत् (तथा) अनार्येषु ....... भवति । यथा ....... तथा ....... ।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) रागे ................ प्रशस्यते ।।
ii) अङ्गेन ................ रात्रिः ।।
iii) यो ................ निवर्तते ।।

**ड) वृत्तनाम चिनुत ।** १

अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः ।
यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति ।।

अस्य श्लोकस्य वृत्तनाम ......... इति । ( इन्द्रवज्रा / उपेन्द्रवज्रा / गीतिः)

**✶ तृतीयः विभागः - स्थूलवाचनम् ।**

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

संस्कृतभाषा राष्ट्रभाषा भवतु इति प्रस्तावः पारितः ।

II) एकपदेन उत्तरं लिखत । १

काः स्मृतीः भीमरायेण अभ्यस्ताः ?

नैकगिरां प्रसवित्री भिन्नप्रान्तीयभारतीयानाम् ।
मान्या सदैव विदुषाम् अर्हति नो राष्ट्रभाषात्वम् ॥१॥
कैश्चित्सांसदमुख्यैः संस्कृतवाग् भवतु राष्ट्रभाषेति ।
प्रस्ताव उपन्यस्तो भीमस्तेषामभूत् प्रमुखः ॥२॥
मैत्रोपनाम विद्वाञ् ज्ञातुं भीमस्य संस्कृतज्ञानम् ।
पप्रच्छ भीमरायं संस्कृतवाण्यैव निजशङ्काः ॥३॥
प्रत्युत्ततार मैत्रं गीर्वाणगिरैव भीमरायोऽपि ।
श्रुत्वा तत्संवादं सर्वेऽप्यासन् चकितचकिताः ॥४॥
वृत्तं तन्नैकेषु प्रकाशितं प्रमुखवृत्तपत्रेषु ।
पाठं पाठं सर्वे प्रभावितास्तस्य चातुर्यात् ॥५॥
प्रस्तावश्चर्चान्ते न पारितो नैकसांसदविरोधात् ।
तेनाभवन् विषण्णाः सर्वे ये संस्कृते रक्ताः ॥६॥
रात्रिंदिवं पठित्वा ग्रन्थान् नानाविधान् संहितार्थम् ।
विरचय्य नूतनविधीन् स्त्रीदलितान् समावेशयत्तस्याम् ॥७॥
अभ्यस्य नैकस्मृतीर् मनुभारद्वाजयाज्ञवल्क्याद्याः ।
चर्चित्वा विद्वद्भिः प्रारूपं रचितं भीमरायेण ॥८॥

२. **पृथक्करणम् ।** २

(मैत्रभीमराययोः संस्कृतभाषया चर्चा अभवत्, भीमरायेण प्रस्तावः उपन्यस्तः, भीमरायेण प्रारूपं रचितम्, नूतनविधिषु स्त्रीदलितानां समावेशनं कृतम्)

[ ] → [ ] → [ ] → [ ]

## ✶ चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) परिच्छेदपूर्तिः ।**

मञ्जूषातः उचितशब्दान् चित्वा परिच्छेदं पुनर्लिखत । ५

शब्दानां माधुर्यं स्वर्गं प्रापयति कटुता च नरके पातयति। एक एव शब्दः जीवनं ......... उतान्यः शब्दः जीवनं नाशयेत्। एकदा द्वयोः धनिनोः मध्ये विवादः उत्पन्नः। तौ ......... गतौ। तयोरेकः अचिन्तयदहं लक्षं रूप्यकाणि ......... स्थापयित्वा न्यायाधीशस्य गृहं गतवान्। न्यायाधीशस्तस्य मन्तव्यं ज्ञात्वा क्रुद्धोऽभवत्। धनिकोऽवदत् भोः, मत्सदृशाः लक्षरूप्यकाणां ......... दुर्लभाः एव। न्यायाधीशः अवदत् लक्षरूप्यकाणां दातारः कदाचिदन्येऽपि भवेयुः परं लक्षरूप्यकाणां निराकर्तारः मत्सदृशाः अन्ये विरला एव। अतः कृपया गच्छतु। न्यायस्थानं ......... मा कुरु । लज्जितः धनिकः धनस्यूतं गृहीत्वा ततः निर्गतः।

(स्यूते, विभूषयेत्, मलिनं, दातारः, न्यायालयं)

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. सुभाषितम् । २. आकाशवाणी । ३. स्वातन्त्र्योत्सवः ।

**क) संस्कृतानुवादः ।**

८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत । ५

i) कार्यक्रम केव्हा सुरु होईल ?

ii) आपण येथे झाडाच्या सावलीत बसू या.

iii) नाटकाच्या प्रारंभी सूत्रधार (आपल्या) बायकोला बोलावतो.

iv) धैर्य माणसाचे मोठे भूषण आहे.

v) सर्व पर्वतांत हिमालय उंच पर्वत आहे.

vi) पक्षी आकाशात उडतात.

vii) तू ती बातमी वाचलीस का ?

viii) फुलांनी बहरलेली ही झाडे सुंदर दिसतात.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१. धातु कथ् (१० उ.प.) २. धातु रक्ष् (१ प.प.)

३. धातु सम् + ऋ (१ प.प.) ४. धातु याच् (१ आ.प.)

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१. भानोः परितः पृथ्वी परिभ्रमति ।

२. अलं साहसम् ।

३. स्वस्ति त्वम् ।

४. नगरस्य बहिः महाविद्यालयः अस्ति ।

**✶ पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।**

**प्र.५. यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | आज्ञार्थः | वर्तमानकालः | परोक्षः भूतकालः | विध्यर्थः | द्वितीयः भविष्यकालः | प्रथमः भूतकालः |
|---|---|---|---|---|---|---|
| श्रु (५ प.प.) | श्रुणोतु | .......... | ......... | शृणुयात् | ........ | ........ |
| ब्रू (२ आ.प) | ........ | ......... | ऊचे | ब्रूवीत | .......... | .......... |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मनः | ...... | ...... |
| षष्ठी | ...... | ...... | पक्षिणाम् |
| तृतीया | त्वया | ...... | ...... |
| पञ्चमी | ...... | ...... | भवद्भ्यः |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(गतवान्, विहरन्तः, कर्तव्यम्, निवर्तमानः, व्याघृष्टः, आस्वाद्यम्, दृष्टम्, उक्तवती)

**ड) समासाः ।**

**विग्रहवाक्यानां समासनामभिः सह मेलनम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | अ | ब |
|---|---|---|
| i) | विशेषाः पक्षिणः, तेभ्यः । | इतरेतर द्वन्द्व समास |
| ii) | त्वरया सह । | उपपद तत्पुरुष समास |
| iii) | देशाः च विदेशाः च, तेभ्यः । | बहुव्रीहि समास |
| iv) | न व्यक्तः, तम् । | प्रादि बहुव्रीहि समास |
| v) | चिरं जीवति इति । | कर्मधारय समास |
| vi) | पर्यटनाय इदम् । | नञ् तत्पुरुष समास |
| vii) | विविधाः वर्णाः येषां ते, तैः । | चतुर्थी तत्पुरुष समास |
| viii) | निर्गतानि अक्षराणि यस्मात् सः । | अव्ययीभाव समास |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) तेन धनिकेन सत्वरं सेवकः प्रेषितः । (प्रयोगपरिवर्तनं कुरुत ।)

ii) त्वं शृणु । ('त्वम्' स्थाने 'भवान्' योजयत ।)

iii) विद्युत्प्रवाहे खण्डिते एतादृशी चर्चा प्रारब्धा । (सतिसप्तमीरचनां निष्कासयत ।)

vi) माता बालकं पाठं पाठयति । (प्रयोजकरचनां निष्कासयत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) भगवद्गीतायाः ......... अध्यायाः सन्ति । (१८)

ii) तस्मिन् जनस्थाने .......... भ्रातरौ न्यवसताम् । (२)

iii) .......... वैद्यस्य आवश्यकता न स्यात् एतदर्थेऽहं सदैव यथाशक्ति प्रयतिष्ये। (७)

iv) मया .......... अपि काव्यरचना न कृता । (एकदा)

**✶ षष्ठः विभागः - अनुवादकौशल्यम् ।**

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

सुनीता अनीता च माधवदासस्य द्वे कन्ये । सुनीतायाः पतिः मालाकारः तथा अनीतायाः पतिः कुम्भकारः । एकदा सुनीता पितरम् अवदत्, ''तात, प्रभूतं पर्जन्यः वर्षतु इति मे इच्छा । येन अस्माकं वनस्पतयः पर्याप्तं जलं प्राप्स्यन्ति ।'' तच्छ्रुत्वा समीपे उपविष्टा अनीता सत्वरम् अवदत्, ''न न । तात। अहं तु चण्डातपं कामये । येन अस्माकं मृद्घटाः सुरक्षिताः स्युः।'' उभयोः कामनाम् आकर्ण्य माधवदासः मनसि अवदत्, ''किमहं वदाम्यत्र ?''

**प्र.६. ब) संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

धनहीनोऽपि शीलाढ्यः पूज्यः सर्वत्र विद्यते ।
शीलहीनो धनाढ्योऽपि न पूज्यः स्वजनेष्वपि ।।१।।
नहीदृशं संवनं त्रिषु लोकेषु विद्यते ।
दानं मैत्री च भूतेषु दया च मधुरा च वाक् ।।२।।

**प्र.६. क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

राजा – तेन हि प्रस्तूयतां विवादः।
देवी – यदि मां पृच्छसि एतयोर्विवाद एव मे न रोचते।
गणदासः – देवि न मां समानविद्यतः परिभवनीयम् अवगन्तुमर्हसि।
विदूषकः – भवति पश्यामि उरभ्रसंपातम्। किं मुधा वेतनदानेन।
देवी – ननु कलहप्रियोऽसि।

**Best of Luck**